तृम्फणम्, तृम्फणम्, तितृम्फिषणम्, तरीतृफणम्;

[1]तृफित्वा-तृम्फित्वा, तृम्फयित्वा, तितृम्फिषित्वा, तरीतृफित्वा;

प्रतृफ्य, प्रतृम्फ्य, प्रतितृम्फिष्य, प्रतरीतृफ्य;

तृम्फम् २, तृफित्वा २-तृम्फित्वा २, } तृम्फम् २, तृम्फयित्वा २, } तितृम्फिषम् २, तितृम्फिषित्वा २, } तरीतृफम् २; तरीतृफित्वा २. }

## (769) "तृन्हू हिंसार्थः" (VI-तुदादिः-1350. अक. वेट्. पर.)

'श्वे तृणेढीति हिंसायाम्, तृहतीत्यूदितस्तृहेः ॥' (श्लो. 195) इति देवः।

[2]तृंहकः-हिका, तृंहकः-हिका, [3]तितृंहिषकः-षिका-तितृक्षकः-क्षिका, [4]तरीतृहकः-हिका;

तृंहिता-त्री-[5]तृण्ढा-ढ्री, तृंहयिता-त्री, तितृंहिषिता-तितृक्षिता-त्री, तरीतृहिता-त्री;

[6]तृहन्-न्ती-ती, तृंहयन्-न्ती, तितृंहिषन्-तितृक्षन्-न्ती; ——

तृंहिष्यन्-[7]तृङ्क्ष्यन्-न्ती-ती, तृंहयिष्यन्-न्ती-ती, तितृंहिषिष्यन्-तितृक्षिष्यन्-न्ती-ती; ——

---

1. 'नोपधात् थफान्ताद्वा' (1-2-23) इति कित्त्वविकल्पः। कित्त्वपक्षे उपधानकारलोपो भवति। कित्त्वाभावपक्षे, नकारलोपो न।
2. नोपधोऽयं धातुः। 'नश्चापदान्तस्य झलि' (8-3-24) इत्यनुस्वारः। एवं सर्वत्र ज्ञेयम्।
3. ऊदित्त्वेनेड्विकल्पः, इट्पक्षे एवं रूपम्। इडभावपक्षे, 'इको झल्' (1-2-9) इति सनः कित्त्वान्न गुणः। 'अनिदिताम्—' (6-4-24) इत्युपधानकारलोपः। 'हो ढः' (8-2-31) इति हकारस्य ढकारः। 'षढोः कः सि' (8-2-41) इति ढकारस्य ककारः। एवमिडभावपक्षे सनि सर्वत्र ज्ञेयम्।
4. यङन्ते ण्वुलि, यङ्निमित्तक उपधानकारलोपः। अभ्यासे, 'रीगृत्वत इति वक्तव्यम्' (वा. 7-4-90) इति रीगागमः। एवं यङन्ते सर्वत्र ज्ञेयम्।
5. ऊदित्त्वेन वलाद्यार्धधातुकेष्विड्विकल्पः। इडभावपक्षे, 'हो ढः' (8-2-31) इति ढत्वे, धत्वष्टुत्वढलोपानुस्वारपरसवर्णाः। एवं तव्यदादिष्वपि ज्ञेयम्।
6. 'तुदादिभ्यः—' (3-1-77) इति शः विकरणप्रत्ययः। शस्य सार्वधातुकत्वेन ङिद्वद्भावात्, 'अनिदिताम्-' (6-4-24) इत्युपधानकारलोपः, अङ्गस्य च गुणाभावः।
7. स्यप्रत्यये, इडभावपक्षे, 'हो ढः' (8-2-31) इति ढत्वे, 'षढोः कः सि' (8-2.41) इति ढकरस्य ककारे, उपधानकारस्यानुस्वारपरसवर्णयोश्च रूपम्।